संस्कृत

ग्रं. ११०

स्तवराज

बटुभैरवस्तवराज

६१८। स्लो. ७१९

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

॥ वटुकभैरवकस्तोत्रम्नेष ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

भै०१. श्रीगणेशायनमः ॐ नमोभैरवाय मेरुपृष्ठेसुखासीनंदेवदेवंत्रिलोचनं शंकरंपरिपप्रच्छ पार्वती परमेश्वरं
१ १ श्रीपार्वती उवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद आपदुद्धारणंमंत्रंसर्वसिद्धिप्रदंनृणां २ सर्वे
षांचैवभूतानांहितार्थंवांछितंमया विशेषतस्तुराज्ञांवैशांतिपुष्टिप्रदंनृणां ३ अंगन्याससंकरन्यासदेहन्या
ससमन्वितं वक्तुमर्हसिदेवेशममहर्षविवर्द्धनं ४ ईश्वरउवाच शृणुदेविमहामंत्रमापदुद्धारहेतुकं स
र्वदुःखप्रशमनंसर्वशत्रुविनाशनं ५ अपस्मारादिरोगाणांज्वरादिनां विशेषतः [illegible]नंस्मृतमात्रेणमं
त्रराजमिमंप्रिये ६ ग्रहराजभयानांचनाशनंसुखवर्द्धनं स्नेहात्तववक्ष्यामितेमंत्रंसर्वसारमिमंप्रिये
७ प्रणवंपूर्वमुद्धृत्यदेवीप्रणवमुद्धरेत् वटुकायेतिवैपश्चादापदुद्धारणायच ८ कुरुद्वयंततः[illegible]म
पश्चाद्वटुकायपुनर्वदेत् देवीप्रणवमुद्धृत्यमंत्रोद्धारमिमंप्रिये ९ मंत्रोद्धारमिमंदेवित्रैलोक्येचातिदुर्लभं अप्रकाश्यमि[illegible]
दंमंत्रंसर्वशक्तिसमन्वितं १० स्मरणादेवमंत्रस्यभूतप्रेतपिशाचिकाः विद्रवंत्यतिभितास्तेकालरुद्रादिवःप्रजा

(2A)

११ पठेद्वापाठयेद्वापिपूजयेद्वापिपुस्तके नाग्निचौरभयंतस्यग्रहराजभयंतथा १२ नचमारीभयंकिंचित्सर्व
त्रसुखवान्भवेत् आयुरारोग्यमैश्वर्यंपुत्रपौत्रादिसंपदः १३ भवंतिसततंतस्यपुस्तकस्यापिपूजनात् श्रीपा
र्वत्युवाच कएषभैरवोनाम आपदुद्धारकोमतः १४ त्वयाचकथितोदेवभैरवःकल्पउत्तमः तस्यनामसह
स्राणिमयुतान्यर्बुदानिच १५ सारमुद्धृत्यतेषांवैनामाष्टशतकंवद यानिसंकीर्तयन्मर्त्यः सर्वदुःखवि
वर्जितः १६ सर्वान्कामानवाप्नोतिसाधकःसिद्धिमेवच ईश्वरउवाच शृणुदेविप्रवक्ष्यामिभैरवस्यम
हात्मनः १७ आपदुद्धारकस्येहनामाष्टशतमुत्तमं सर्वपापहरंपुण्यंसर्वापत्कनिवारणं १८ सर्वकामा
र्थदंदेविसाधकानांसुखावहं नामाष्टशतकस्यास्यछंदोनुष्टुपमकीर्तितं १९ बृहदारण्यकोनामऋ
षिर्देवोथभैरवः सर्वकामार्थसिध्यर्थेनियोगःप्रकीर्तितः २० भैरवंमूर्ध्निविन्यस्यललाटेभीमदर्शनं
नेत्रयोर्भूतहननंसारमेयानुगंभ्रुवोः २१ कर्णयोर्भूतनाथंचप्रेतवाहंकपोलयोः नासापुटेोष्ठयोश्चैवभ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

भैरव स्मांगंसर्पभूषणं २२ अनादिभैरवमास्येचशक्तिहस्तंगलेन्यसेत् स्कंधयोर्दैत्यसमनंबाहोरतुलतेजसं २३ पाणयोः
कपालिनंन्यसेत्हृदयेमुंडमालिनं शांतंवक्षस्थलेन्यसेत्स्तनयोःकामचारिणं २४ उदरेचतथान्यस्येत्क्षेत्रेशंपा
२ र्श्वयोस्तथा क्षेत्रपालंपृष्ठदेशेक्षेत्रज्ञंनाभिदेशके २५ पापौघनाशनंकट्यांवटुकंलिंगदेशके गुदेरक्षाकरंन्य
स्येत्तथोर्वोरक्तलोचनं २६ जान्वोर्धुर्धुरारावंजंघयोःरक्तपायिनं गुल्फयोःपादुकासिद्धंपादपृष्ठेसुरेश्वरं
२७ आपादमस्तकंचैवआपदुद्धारकंतथा पूर्वेडमरुहस्तंचदक्षिणेदंडधारिणं २८ खड्गहस्तंपश्चिमस्यांघं
टाचादिनमुत्तरे आग्नेय्यामग्निवर्णंचनैरृत्येचदिगंबरं २९ वायव्येसर्वभूतस्थमीशान्येचाष्टसिद्धि
दं ऊर्ध्वेखेचरिणंन्यस्यपातालेरौद्ररूपिणं ३० एवंविन्यस्यदेहस्यषडंगेषुतथान्यसेत् हृदयेभूतना
थायआदिनाथायमूर्धनि ३१ आनंदपदपूर्वायनाथायायशिखास्वच सिद्धशाबरनाथायकवचेवि
न्यसेत्तथा ३२ सहजानंदनाथायन्यसेन्नेत्रत्रयेतथा निस्सीमानंदनाथायअस्त्रेचैवमनोपयत् ३३

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

एवंन्यासविधिंकृत्वापश्चात्तदनंतरं ध्यानंतस्यमवक्ष्यामियथाध्यात्वापठेन्नरः ३४ शुद्धस्फटिकसंका
शसहस्रादित्यवर्चसं नीलजीमूतसंकाशंनीलांजनसमप्रभं ३५ अष्टबाहुंत्रिनयनंचतुर्बाहुंद्विबाहुकंदंष्ट्राकराल
वदनंनूपुरारावशंकुले ३६ भुजंगमेखलंचैवमणिनूपुरराणांशिरोरुहे दिगंबरंकुमारीशंवटुकाख्यंमहाबलं ३७
खट्वांगमसिपाशंचशूलंदक्षिणभागतः डमरुंचकपालंचवरदंभुजगंतथा ३८ अग्निवर्णसमोपेतंसार
मेयसमन्वितं ध्यात्वाजपेत्सुसंतुष्टः सर्वान्कामानवाप्नुयात् ३९ अस्यश्रीआपदुद्धारवटुकभैरवस्तो
त्रस्यबृहदारण्यकोनामऋषिरनुष्टुपछंदः श्रीवटुकभैरवोदेवतासर्वकामार्थसिध्यर्थेजपेविनियोगः बृ
हदारण्यकऋषयेनमः शिरसि मुखेवगायत्रिछंदसेनमः हृदिवटुकभैरवदेवतायैनमः ततोमन्त्रन्यासः ह्रूंवंई
शानायनमोंगुष्ठयोः ह्रिंविंतत्पुरुषायनमस्तर्जन्योः ह्रुंवुंअघोरायनमोमध्यमयोः ह्रैंवैंवामदेवायनमोना
मिकयोः ह्रौंवौंसद्योजातायनमः कनिष्ठयोः प्रस्तरंगुलीभिः शिरोवदनहृद्गुह्यपादेषुतन्नमस्तान्न्यसे

भैरव ३

त ततः करांगन्यासो ह्रां वां अंगुष्ठाभ्यां नमः ह्रीं वीं तर्जनीभ्यां नमः ह्रूं वूं मध्यमाभ्यां नमः ह्रैं वैं अनामिकाभ्यां नमः ह्रौं
वौं कनिष्ठिकाभ्यां नमः ह्रः वः करतलकरपृष्ठाभ्यां नमः इति करन्यासं कृत्वा अंगन्यासं समाचरेत् तद्यथा ह्रां वां हृ
दयाय नमः ह्रीं वीं शिरसे स्वाहा ह्रूं वूं शिखायै वषट् ह्रैं वैं कवचाय हुं ह्रौं वौं नेत्रत्रयाय वौषट् ह्रः वः अस्त्राय फ
ट् इति न्यासाः अथ ध्यानं वंदे बालं स्फटिकसदृशं कुंतलोल्लासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनू
पुराद्यैः १ दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां बटुकमनिशं शूलदंडौ दधानं २ उद्यद्भास्कर
संनिभं त्रिनयनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः नीलग्रीवमुदारभूषणशतं शीता
शुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावये ३ ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं राम
दिग्वस्त्रं पिंगलाक्षं डमरुमथ सृणिं खड्गशूलाभयानि नागं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं स्वर्णा ३
कल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराद्यं ४ करकलितकपालः कुंडली दंडपाणिस्तरुणतिमिर

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3A)

नीलोव्यालयज्ञोपवीती कृतसमयसपर्याविघ्नविस्लेसहेतुर्जयति वटुकनाथः सिद्धिदः साधकानां १ ॐ भैर
वोभूतनाथ स्वभूतात्माभूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियोविराट् १ स्मसानवासीमांसाशीख
र्पराशीस्मरांतकृत रक्तपः पानपः सिद्धः सिद्धिदः सिद्धः सेवितः २ कंकालः कालशमनः कलाकाष्टातनुः
कविः त्रिनेत्रोवहुनेत्रश्चतथापिंगललोचनः ३ स्मूलपाणिखड्गपाणिः कंकालीधूम्रलोचनः अभीरु
र्भैरवोनाथोभूतपोयोगिनीपति ४ धनदोधनहारीचधनवान्प्रतिभानवान् नागहारोनागकेशोव्योमके
शः कपालभृत् ५ कालः कपालमालीचकमनीयः कलानिधिः त्रिलोचनोज्वलनेत्रस्त्रिशिखीचत्रिलोक
पः ६ त्रिनेत्रतनयोडिंभः शांतः शांतजनप्रियः वटुकोवटुवेषश्च खट्वांगवरधारकः ७ भूतध्यक्षः प
शुपतिर्भिक्षुकः परिचारकः धूर्त्तोदिगंवरः शूरोहरिणः पांडुलोचनः ८ प्रशांतः शांतिदः शुद्धः शंकर
प्रियबांधवः अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ९ अष्टाधारः षडाधारः सर्पयुक्तः शिखिसखः

(5)

भैरव भूधरो भूधराधीशो भूपतिर्भूधरात्मजः १० कंकालधारी मुंडी च आंत्रयज्ञोपवीतवान् जृंभणो मोहनः स्तंभी मार
४ णः क्षोभनस्तथा ११ शुद्धो नीलांजनप्रख्यो दैत्यहा मुंडभूषितः बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः १२
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः कामी कलानिधिः कान्तः कामिनीवशकृद्वशी १३ सर्वसिद्धिप्रदो वैद्यः
प्रभुर्विष्णुरितीव हि अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः १४ मया ते कथितं देवि रहस्यं सर्वकामदं य
इदं पठते स्तोत्रं नामाष्टशतमुत्तमं १५ न तस्य दुरितं किंचिद्रोगाणां च भयं तथा न शत्रुभ्यो भयं किंचित्प्राप्नुया
न्मानवः क्वचित् १६ न पातकाभयं चैव यः पठेत्स्तोत्रमुत्तमं मारीभये राजभये तथा चौराग्निजे भये १७ औत्पा
तिके महाघोरे तथा दुःस्वप्नजे भये बंधने च महाघोरे पठेत्स्तोत्रमनुत्तमं १८ सर्वं प्रशममायाति भयं भैरवकी राम
र्तनात् एकादशसहस्रं तु पुरश्चरणमुच्यते १९ ॥ यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः स सिद्धिं प्राप्नु ४
यादिष्टां दुर्लभामपि मानवः २० षण्मासान्भूमिकामस्तु जप्त्वा प्राप्नुयान्महीं राजशत्रुविनाशार्थं जपे

(5A)

न्मासाष्टकंपठेत् २१ रात्रौवारत्रयंदेवि नाशायसेवशत्रवान् जपेन्मासत्रयंमर्त्यो राजानंवशमानयेत् २२ धना
र्थीवास्तता र्थीवादारा र्थीयस्तमानयः जपेन्मासत्रयंदेवि वारमेकंमहानिशि २३ धनंपुत्रंतथादारान्प्राप्नुयात्
न्नचसंशयः रोगीरोगात्प्रमुच्येत बद्धोमुच्येतबंधनात् भीतोभयात्प्रमुच्येत् देविसत्यंनसंशय निगडैश्चापि
यो बद्धः कारागृहनिपातितः श्रृंखलाबंधनंप्राप्तः पठेच्चैवमहानिशि यान्यान्समिहतेकामान् स्तान्स्तान्
प्राप्नोतिशंशयः २६ अप्रकाश्यंपरंगुह्यंनदेयंपरस्य कस्यचित् सकुलिनायशांतायऋजवेदंभवर्जिते २७
दद्यात्स्तोत्रमिदंपुण्यंसर्वकामफलप्रदं भैरवोपिमत्स्कृप्तोभूतसस्त्वंपचमहेश्वरः २८ एवंश्रुत्वाततोदेवीनामा
मृतमुत्तमं संतोषंपरमंप्राप्य भैरवस्यमहात्मनः २९ जयायपरमाभक्त्यासदासर्वेश्वरेश्वरी ३० इतिश्री एम
विश्वसारोद्धारे आपदुद्धारे आपदुद्धारवटुकभैरवस्तवराजः समाप्तः शुभंभयात् शुभमस्तु ॐ ह्रीं ५
वटुकाय आपदुद्धारणाय कुरुकुरु वटुकायह्रीं इतिमूलमंत्र इतिमिः प्रसवसुदी ८ वारसोमारके

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com